No. १२८९

Title कारक व्याख्या कारक वादो

Author म.म. जयराम. न्याय पञ्चानन भट्टाचार्य

Extent २५ Age १८३२

Subject न्याय वैशेषिकम्

कारकव्याख्या कारकवादोवा

१२८९

११९

कारकव्याख्या



का॰ च॰
॥१॥

श्रीगणेशाय नमः॥ ॥नत्वा मां श्रीः पदांभोजं जयरामः समासतः॥ करोति कारकव्याख्यां मितसंख्यावतां मुदे॥१॥
तत्र कारकाणि कर्तृकर्मकरणसंप्रदानापादानाधिकरणानि षट्॥ तत्त्वं च तत्र न क्रियानिमित्तत्वम्॥ चैत्रस्य
तंडुलं पचतीत्यादौ संबंधिनि चैत्रादावतिव्याप्तेः अनुमत्यादिप्रकाशनद्वारा संप्रदानादेरिव तंडुला
दिसंपादनद्वारा संबंधिनोपि पाकादिक्रियानिमित्तत्वात् किंतु क्रियान्वितविभक्त्यर्थान्वितत्वं तल्लक्षणं
च कर्तृकर्मादेः क्रियान्वितत्तिप्रसुप्तविभक्त्यर्थान्वयोनतूदाहृते संबंधिनि षष्ठ्यर्थसंबंधस्य तंडुलादि
नामार्थान्विततया क्रियानन्वितत्वाच्चैत्रस्य पचतीत्यादावपि तंडुलादिपदाध्याहारेणैव बोधः षष्ठ्य
र्थसंबंधस्य नामार्थेनैव क्रियायाः कर्मत्वादिनैव साकांक्षतया परस्पराकांक्षाविरहात् ओदन
स्य भोक्ता मैत्रस्य पाक इत्यादौ कर्मत्वकर्तृत्वार्थिका षष्ठी कारकविभक्तिरेव कर्तृकर्मणोः कृती

रा॰ स॰
॥१॥

(इत्युपलक्षणं ।। अध्याहृतरोगविपत्त्यादि सम्बध्यते [illegible] एव न [illegible] संपूर्ण [illegible] रोगनाशानुकूलव्यापाराद् रूपमिति पूर्वी [illegible]
[illegible] न्वितार्थ [illegible] रूपस्य [illegible] [illegible] व्याख्यातं [illegible]
(मैत्र [illegible])

सनेन तद्विधानात् ।। अत एव संबंधस्य न कारकत्वं क्रियायोगाभावादिति प्राचीनाः ।। अत एव गुरुविप्रतपस्वि
दुर्गतानां प्रतिकुर्वीत भिषक्स्वभेषजैः इत्यादौ सालक्षणी रूपकुरुतेयया परेषामित्यादौ ज्वररोगविपत्त्यादि
त्यादिनामाध्याहारेणैव बोधः ।। यद्विविनाऽध्याहारं तत्र क्रियायां षष्ठ्यर्थसंबंधान्वयः प्रामाणि

त्व४

कैः तथा क्रियान्वितकर्तृकर्मत्वादिषट्कान्यतमान्वयित्वं कारकत्वं बोधम् ।। अत एव चर्मणि द्वीपि
नं हंतीत्यादौ निमित्ते दर्पि कारकत्वमित्येता उपपदविभक्तयो न तु कारकविभक्तयः ।। गां पयो
दोग्धि अजां ग्रामं नयतीत्यादौ गौणमुख्यकर्मद्वयमपि लक्ष्यम् ।। अत्र तेष्विव द्रव्यविभागानुकूल
क्रियानुकूलव्यापारविशेषः ।। कर्तृनिष्ठो दुहेरर्थः वायुर्वृक्षं पर्णं दोग्धीति वारणाय द्रवद्रव्ये
ति ।। मेघो गगनं जलं दोग्धीति वारणाय विशेष इति ।। विशेषो दुह धातुप्रयोगगम्यः ।। इत्थं च
द्रवद्रव्येति न देयमित्यपि वदंति ।। संयोगानुकूलक्रियानुकूलव्यापारस्याहरणे नीधातोरत्र

का॰ च॰
॥२॥

द्वय न्विता

घे विभागे ग्रामिलस्य क्रियायां पयइत्यस्यान्वयात् ॥ गोवर्त्तिविभागानुकूलपयोवर्त्तिक्रियानुकूलव्यापारानुकूलयत्नवानिति वाक्यार्थः ॥ द्वितीये ग्राममिलस्य संयोगे अजा मिलस्य क्रियायामन्वयात् ग्रामवर्त्तिसंयोगानुकूल[illegible]जावर्त्तिक्रियानुकूलव्यापारानुकूलकृतिमानित्ति वाक्यार्थः ॥ साक्षाद्धात्वर्थतावच्छेदकनिरूपितक्रियारूपफलान्वयिनोरजापयसोर्मुख्यकर्मत्वं ताद्दशक्रियारूपफलावच्छेदकविभागसंयोगरूपफलद्वयान्विता न्वयिनोर्गोग्रामयोर्गौणकर्मत्वं ॥ उभयत्रैव धात्वर्थान्वितविभक्त्यर्थान्वितत्वमपि फलद्वयस्यापि धात्वर्थत्वात् ॥ अत एव कर्मद्वयसाकांक्षफलबोधक[illegible]धातुत्वं द्विकर्मकत्वं संपपन्नम् ॥ यत्तु विभागानुकूलक्रियादुहेः संयोगानुकूलक्रिया नयतेरर्थो न तु तदुभयानुकूलकर्तृव्यापारः कर्मद्वयस्यापि विभागे संयोगे चान्वय इति तन्न ॥ पयोऽजयोः कर्मत्वानुपपत्तेः परसमवेतत्वस्य क्रिया

राम॰
॥२॥

याभावात्कर्मद्वयस्याप्येकत्रफलेऽन्वयेन गौणमुख्यव्यवहारो न स्यात्।। एतेन विभागाद्यनुकूलकर्तृगतत्वेऽप्येवं दुहादेरर्थद्व
त्वमप्यपास्तम्।। फलद्वयाप्रवेशे गौणमुख्यव्यवहारानुपपत्तेः।।। यदपि गामित्यस्य पयोगोवृत्तित्वं पयस्येवान्वेती
ति गौणमुकर्मत्वं लक्ष्यमिति तदपि न गौः पयो दुह्यत इत्यादौ गोः कर्मत्वस्य दुरुपपादत्वात्।। अजां ग्राममि
त्यादौ ग्रामनिष्ठत्वस्य प्रागजायामसत्त्वेनान्वयायोगात् कर्मप्रतीतः प्रयोगे नीयमानामजां कौपीनं नयती
ति प्रयोगापत्तेश्च।। तत्र तत्तत्क्रियानुकूलकृतिमत्त्वं तत्तत्क्रियाकर्तृत्वम्।। काष्ठादौ पाकाद्यनुकूलव्या
पारवत्त्वप्रतिसंधानेऽपि कर्तृपदाप्रयोगात् कृताकृतविभागादिना सिद्धयत्नप्रशक्तिकेन कृधातुना
त्वं तेन सिद्धस्य कर्तृशब्दस्य यत्नाश्रयबोधनाच्च।। अचेतने कर्तृपदप्रयोगस्तु गौणः रथो गुरुतरभा
रेणेलनादिक्रियाविषयकयत्नसत्त्वेऽपि तत्तत्क्रियायाः अनिष्पत्तौ तत्तत्क्रियाकर्तृत्वाव्यवहाराद्विषय
त्वं विहायानुकूलत्वमुपात्तम्।। यदि च मन्त्रेण मृतं न तु मया कृतमिति व्यपदेशान्नान्तरीयकं कृतिस

का॰ व॰
॥३॥

३

धस्यपिष्टमधस्यशर्करादिभोजनस्यनकर्तृत्वंतदाविषयत्वमपिनिवेश्यंतन्नुसाध्यत्वेनतेनयागादिकृतेरुद्दे
श्यत्वेनस्वर्गादिविषयकत्वेपिनयागादिकर्तृः स्वर्गादिकर्तृत्वंअस्मदादिकर्तृकपाकादिकर्तृत्वईश्वरस्ये
ष्टंतथाचविवक्षायामीशःपचतीतिप्रयोगोपीष्टएवनोचेत्कार्यत्वानवच्छिन्नजन्यतानिरूपितमसा
धारणमनुकूलत्वंनिवेश्यमितिनैयायिकाः॥ वैयाकरणास्तुअनभिहितेकर्तरीत्याद्यवपिकर्तृ
पदप्रयोगात्क्रियाश्रयत्वमेवकर्तृत्वंकारककर्मादिपदइवकर्तृधातुरप्यत्रक्रियार्थकएवाश्रय
त्वमिहतत्तदाख्यातार्थः इत्थंतथाचपचगाद्यसमभिव्याहृताख्यातेनयद्भावार्थान्वितयद्धर्म
वत्त्वंबोध्यतेतद्भावार्थनिरूपिततद्धर्मवत्त्वंतद्भावार्थकर्तृत्वंयथापचतीत्यादौपाकाद्यनुकूल
व्यापारवत्त्वंजानातीत्यादौज्ञानाद्याश्रयत्वंनश्यतीत्यादौनाशप्रतियोगित्वंचैत्रेणपच्यते
तंडुलइत्यादौपाकजन्यफलाश्रयत्वंवारणाद्ययगाद्यसमभिव्याहृतेतिअत्रचैत्रादेःकर्तृ

चेत नै

राम॰
॥३॥

त्वंतुपचतीत्याख्यातबोध्यधर्ममादायैवेतिबोध्यम्॥ धात्वर्थान्वितद्वितीयाद्यर्थकर्मत्वकरणत्वादिवार
णायआख्यातेनेति॥ यथाकाष्ठंपचतिस्थालीपचतीत्यादिप्रयोगात्करणादीनांकर्त्तृत्वमिष्टं
पच्यतेओदनःस्वयमेवेत्यादौकर्मकर्त्तरिकर्मणोपिओदनःस्वंपचतीत्यप्रयोगस्त्वसाधुत्वा
च्चैत्रोमैत्रंग्रामंगमयतीत्यत्रापिमैत्रादेःकर्त्तृत्वमिष्टमेव॥ अत्रगमनानुकूलव्यापारेतिणि
जंतार्थस्तदनुकूलव्यापारश्चाख्यातस्यतत्रचणिजंतार्थव्यापारस्यापिपचतीत्याद्याख्याता
र्थत्वात् अनुकूलकृतिमत्त्वस्याप्यत्रसत्त्वाच्चेति किमाख्यातपदेनेतिविभाव्यतेतदाकर्मत्व
त्वकरणत्वत्वविशिष्टस्यकर्त्तृत्वरूपतावारणायतदुपादेयम्॥ नहिकर्मत्वादेःकर्त्तृत्वरूप
त्वेऽनभिमतेतिकर्त्तरितृतीयेत्याद्यनुशासनाद्यैःसंगच्छतेइत्याहुः।परंतुस्वतंत्रःकर्त्तेति

का॰ व॰
॥४॥
५

पारिति निस्सूत्रात्कारकांतराप्रयोज्यत्वे सति कारकांतरप्रयोजकत्वं कर्तृत्वं सत्यं तेन पुरुषादिजन्य[illegible]सं
योगादिरूपव्यापारवत्त्वरूपतत्प्रयोज्यत्ववतः कुठारादेर्व्युदास इति तन्न ॥ ईश्वरप्रयोज्यानां
जीवानां कर्तृत्वानापत्तेः दंडादिजन्यसंयोगादिरूपव्यापारवति कुलालादावव्याप्तेश्चेति दिक् ॥
अथ किं कर्मत्वं न कार[illegible]णव्यापार्यत्वं तद्धि करणजन्यव्यापारवत्त्वं दात्रेण धान्यं लुनातीत्यादौ
हस्तादिकरणव्यापार्ये दात्रादावतिव्याप्तं । नापि परसमवेतक्रियाजन्यफलशालित्वं गामि
पत्येः कर्मत्वस्य पूर्वस्मिन्देशे त्पजेष्वोत्तरस्मिन्स्पंदेः पूर्वापरयोः प्रसंगान्ने दीव[illegible]तेर
त्यादेर्वृक्षेर वयवोपचयरूपायाः परंपरस्थायाफलस्यातीरप्राप्तिरूपस्य प्राप्येतीरे कर्मत्वा
पत्तेश्चेति चेत्तु ॥ अत्र वदंति । धात्वर्थतावच्छेदकफलशालित्वं कर्मत्वं तादृशं च फलं गमेः सं
योगस्त्यजेर्विभागः पतेरधःसंयोगः [illegible]स्पंदे तेषां प्राक्केः स्पंदमात्रे तेषां

राम॰
॥४॥

ब

शक्तौ पर्यवसितापत्तेः स्यंदेर्व्धधातोश्च न फलावच्छिन्नव्यापारे शक्तिरिति न कोपि दोषः फलावच्छिन्नव्या
पारबोधकत्वादेः धातूनां सकर्मकत्वव्यवहारे मुख्ये जानात्यादीनां तु नाम्नोर्थान्वितउद्देश्य
त्वातिरिक्तविषयित्वरूपविभक्त्यर्थान्वय्यर्थकत्वं गौणसकर्मकत्वं च जानातीत्यादितो द्वितीया विषयि
ताश्रयलिङ्गिनाश्रयितावानिति बोधस्तादृशधातुयोगएव च कर्मप्रत्ययाः ।। अतएवाभुंजानोपि
भोजनरपयत इति प्रयोगात् यत धात्वर्थेन नामार्थान्वितस्य च तु र्थ्यर्थे द्देश्यत्वस्यैवान्वयात्क
यतेः सकर्मकत्वं न वा भोजनयतते इति प्रयोगः ।। अत्र भूमिं प्रयाति विहगो विजहाति मही
रुहं न तु स्वात्मानमिति प्रयोगात्स्वस्य धात्वर्थतावच्छेदके संयोगविभागरूपफलशालि
त्वेपि कर्मत्वाभावात्परसमवेतक्रियाजन्यत्वमपि धात्वर्थतावच्छेदकफले निवेश्यम् ।। न चै
वमपि मल्लो मल्लं गच्छतीत्यादावुभयकर्मजसंयोगरूपफलस्य तादृशत्वात्स्वकर्तृक

ता २

का॰ व॰
॥५॥
5

क्रियाकर्मत्वव्यवहारः स्वस्मिन्स्यात्परसमवेतयाक्रियाजन्यताद्दशफलप्राप्तिवं यत्रतत्रतक्रियाकर्मत्व
स्यस्वीकारात् ॥ इसंचद्वितीयादेः क्रियान्वयिपरसमवेतत्वमप्यर्थः परत्वंस्वप्रकृत्यर्थापेक्षयाम्नु
पास्वार्थफलान्वय्यपेक्षयाकर्मारव्य ।तेनबोध्यते ।तथाचभूमिंत्रयातीत्यादौनो भूमिभिन्न
समवेतभूमिवह्निसंयोगजनकस्पंदानुकूलकृतिमानितिबोधः ।एवंचस्वभिन्नसमवेतस्व
वह्निसंयोगजनकंयन्मल्लातरवह्निगमनंतदनुकूलकृतिमत्वस्यस्वस्मिन्नभावान्नमल्लःस्वंग
गच्छतीत्यादिप्रयोगः ॥ अन्यत्रपरत्वेप्रकृत्याद्यर्थस्यान्वयितावच्छेदकावच्छिन्नप्रतियोगित
याप्रतियोगितामात्रेणवान्वयः ॥ आद्येः ।पृथिवींप्रयातीत्[illegible]रवगइत्यादावनन्वयापत्तेः खग राम॰
स्यपृथिवीत्वावच्छिन्नभिन्नत्वाभावात् ॥ द्वितीयः ।स्वात्मन्यपिस्वघटोभयभेदसत्वात्स्वंप्रया ॥५॥
तीत्याद्यापत्तेरितिचेन्न ॥ द्वितीयाद्यर्थफलेयच्छकेरन्वयस्तच्छक्तित्वावच्छिन्नप्रतियोगि

ताकत्वसंबंधेन प्रकृत्यर्थस्य कर्माख्यातार्थफलान्वयिन स्वपरत्वेऽन्वयात। इत्यं च पृथिवीं प्रयातीत्यादौ
यत्पृथिवीव्यक्तिवृत्तिसंयोगजनकत्वं प्रयाणस्य तद्व्यक्तिभिन्नत्वं विहगेऽस्तीत्यदोषः। परे तु पृथिवीं
प्रयातीत्यादौ पृथिवीपदं कर्मीभूततत्तत्पृथिवीव्यक्तिपरमेवमन्यत्र कर्मवाचकस्थानेऽन्यपदं
लक्षणया विशेषपरं। इत्थं चान्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वस्य सत्वेन भंग इत्या
हुः। यत्तु परसमवेतत्वं नार्थः किंतु अन्योन्याभावप्रतियोगितावच्छेदकत्वं क्रियान्वयिद्वितीयार्थः। तथा च भूमिवृत्तिसंयोगजनकभूमिनिष्ठान्योन्याभावप्रतियोगितावच्छेदकप्र
याणानुकूलकृतिमानित्यर्थः स्ववृत्तिक्रियायाः स्वनिष्ठान्योन्याभावप्रतियोगितानवच्छे
दकत्वान्नस्वं प्रयातीत्यादेः प्रसक्तिरिति तन्न। एवमपि येन मल्लेन मल्लांतरं न गतं सोपि स

पाठांतरंपत्रांतरे३ सतितत्क्रियावच्छेदकफलशालित्वंकर्मत्वंद्वितीयादेरपितत्क्रियानधिकरणत्व ४

का॰व॰
॥६॥

त्रोमल्लुंगच्छतीतिप्रयोगापत्तेर्मल्लांतरनिष्ठभेदप्रतियोगितावच्छेदिकायास्तन्मल्लक्रियायास्तन्मल्लभू
मिवृत्तिसंयोगजनकत्वाघन्मल्लव्यक्तेः फलान्वयस्तस्याएवान्योन्याभावेऽन्वयोक्तौतद्व्यक्तित्वादेः
प्रकारत्वेस्फुरक्रियानंतर्पकर्षंवित्संसर्गत्वेतत्परसमवेतत्वमेवसम्यक्॥ अन्योन्याभावस्याव्याप्य
वृत्तित्वेप्यक्षतेः॥ एतेनतत्क्रियानधिकरणत्वेमर्पइत्यपास्तम्॥ अनंतरक्रियापत्तेः॥ यत्तुक्रियान्वयि
परसमवेतत्वमपेक्ष्यकर्त्रन्वयिपरत्वमेवलाघवात्कर्मप्रत्ययार्थइतितन्न॥ द्वितीयार्थफलपरस
मवेतत्वयोरेकान्वयित्वेलाघवाज्ज्ञमोगमेः कर्मनतुचैत्रइत्यादौपरसमवेतक्रियाजन्यत्वघ
टितस्यैवकर्मपदार्थतयातस्यैवकर्मप्रत्ययार्थत्वात्गम्यतेग्रामः स्वयमेवेत्यादौपरत्वान्वयि
विरहाद्वेतिदिक्॥ अथैवमपिपतेरधः संयोगावच्छिन्नस्पंदार्थकतयाधात्वर्थतावच्छेदक

रामः
॥६॥

फलशालिनोभूतलादेः कर्मत्वेवृक्षात्पर्णंभूतलंपततीतिप्रयोगः स्यादितिचेतःतर्पोवि

(२ कर्मवाचकपदस्य तत्तद्धात्वर्थतावच्छि... संग्रहः समानाधिकरणविशेषणावस्था ...)

वज्ञायांभवत्येव.अतएवद्वितीयाश्रितातीतपतितेत्यादिसूत्रेपतितशब्दयोगेद्वितीयासमासविधानं
तदुदाहरणंचनरकंपतितोनरकपतितइतिसाधुसंगच्छतेद्व्विलसत्सम्यपिसाधुः।यथाभूमौ
पततीतिग्रामंगच्छतीतिवत।परंतुभूतलादेःकर्मत्वेपिनद्वितीयायत्रफलस्यसंबंध्याकांक्षातत्रैव
तत्स्वीकारात्इत्रतुफलस्याधोवृत्तितयोपस्थितेर्नसंबंध्याकांक्षा।।यद्वाकर्त्रभिन्नान्वयि
फलावच्छिन्नव्यापारबोधकस्यैवधातोःसकर्मकत्वं।यथागम्यादेः।नतुपतेरधःसंयोगरूप
फलस्यपर्णान्वितत्वात।।अथइत्यस्यसंबंधिसाकांक्षतयासंबंधित्वेनपर्णस्यैवान्वयो
भूतलंहिपर्णस्याधोनतुभूतलस्येतिनभूतलंपततीतिप्रयोगइत्याहुः।।किंपर्णंत्वत्र

किंपर्णंत्वत्र

तर्हि ३

अधःपततीतिप्रयोगइतिचेत्नप्रमादएवधोविवस्वधावाग्नोततिरश्चीनमनूरुसारथेःप्र
सिद्धमस्रर्जुज्वलनहविर्भुजः।पतत्यधोधामविसारिसर्वतःकिमेतदित्याकुलमीक्षितं

स्पप्२

का॰ व॰
॥८॥
7

जनेरित्यत्र तु नाऽदस्याधो धामपततीत्यर्थान्वेदोषः यत्तु त्यजिगम्यादेः स्पंदाद्यात्मकव्यापारमात्रे शक्तिः
फलस्य द्वितीयादिलभ्यत्वात् ॥ अत एव ग्रामं त्यजति ग्रामं गच्छतीत्यनयोर्नैकार्थता त्यजिगम्योर्योगे द्वि
तीयादिना विभागसंयोगयोर्विधिना त्यजेर्विभागावच्छिन्नस्पंदशाब्दत्वस्य गमेः संयोगावच्छिन्न
स्पंदशाब्दत्वस्य कार्यतावच्छेदकत्वात् ॥ अत एव गमनं त्यागं इत्यनयोरपि नैकार्थता उक्तकार्यका
रणभावानुरोधेनात्रापि त्यजिगम्योर्विभागसंयोगावच्छिन्नस्पंदे लक्षणा स्वीकार्या द्विभागा
द्यवच्छिन्नस्पंदशाब्दत्वं च विभागादिस्पंदोभयवैशिष्ट्यावगाहिशाब्दत्वं तेन चैत्रेण ग्रा
मः त्यज्यते इत्यादि जन्यस्पंदविशेषणक विभागादिविशेष्यक शाब्दबोधसंग्रहः ॥ इत्थं च पर
समवेततज्जन्यत्वपर्यन्वयिफलविशेषशालित्वं तज्जन्यत्वपर्यकर्मत्वम् ॥ तेन त्यजादेर्नेत्तिरदे
शादेकर्मत्वमिति ~~तावन्न~~ ॥ विभागाद्यवच्छिन्नस्पंदशाब्दत्वस्य जन्यतावच्छेदकत्वे ताद्दशस्पंदं

राम॰
॥८॥

नाहशालं ब देब तो देरचर ख ४ चिर

रिमार्तेर्दुर्वारत्वात्परेषामितरान्वितेशक्तिग्रहेद्भुतसंशावद्विभागाद्यंशस्यत्यागस्तनयुक्तः त्यागगमनयोरेकार्थतावारणाय तत्फलविशिष्टस्वं देशक्तिसिद्धिर्विनालक्षणाप्रतिसंधानं तथा प्रतीतेरितिदिक्॥ एवं च सतेमूल्यग्रहणं विना स्वस्वत्वध्वंसपरस्वत्वजनकत्यागोयजतेर्देवदत्तो

तो २

स्वा ४

द्देश्यकस्वस्वत्वध्वंसफलकत्यागोजुहोतेस्तोद्देशाग्निप्रक्षेपः॥ अतएव ऋत्विजां तादृशत्यागाभावेपिहोतृत्वमग्निप्रक्षेपश्चाग्निसंयोगानुकूलक्रियानुकूलोहि तादृशवृत्तिमेदनादिव्यापारः॥ नचैवमग्नौजुहोतीत्यादौसप्तम्यर्थस्याग्निसंयोगेऽन्वयेनिराकांक्षतेतिवाच्यम्॥ अत्रसंयोगानुकूलक्रियानुकूलव्यापारस्यैव धात्वर्थत्वात्॥ नचतथाप्यग्नेः कर्मत्वापत्तिः संयोगस्य धात्वर्थतावच्छेदकतावच्छेदकतयातद्वतोऽग्नेः कर्मत्वाभावात्क्रियापारएवधात्वर्थतावच्छेदकतयातात्पर्यान्नेर्लिनोद्धतस्यैवकर्मत्वात्॥ इत्थंचविप्रायगांददातिविक्रीयजते द्युतंजु

का०व०
॥८॥
8

तोतीत्यादौ मूल्यग्रहणं विना विक्रोद्देश्यकगोवृत्तिस्वस्वत्वध्वंसपरस्वत्वजनकत्यागानुकूलकृति
मान् विक्रेतृउद्देश्यकस्वस्वत्वध्वंसफलकत्यागानुकूलकृतिमान् घ तव अग्निसंयोगावच्छिन्न
क्रियानुकूलव्यापारानुकूलकृतिमानित्यन्वयबोधः विक्रेतृ उद्देश्यकत्वसंबंधेन स्वस्वत्वध्वं
सरूपफले वृत्त्वात्कर्मत्वम्॥ एवं मूल्यग्रहणप्रयुक्तस्वस्वत्वध्वंसपरस्वत्व जनकस्त्यागो विक्र
यो मूल्यदानप्रयुक्तस्वस्वत्वोत्पादकस्वीकारः क्रयः दत्तद्रव्यस्यस्वत्वजनकस्वीकारः प्रतिग्रहः॥
तथा च गां विक्रीणाति क्रीणाति प्रतिगृह्णातीत्यादौ गोवृत्तिमूल्यग्रहणप्रयुक्तस्वस्वत्वध्वंस
परस्वत्वानुकूलत्यागानुकूलकृतिमान् गोवृत्तिमूल्यदानप्रयुक्तस्वत्वानुकूलस्वीकारानु राम०
कूलकृतिमान् गोवृत्तिदत्तद्रव्यस्वत्वजनकस्वीकारानुकूलकृतिमानिति क्रमेणान्वयबुद्धिरिति ॥८॥
संप्रदायः॥ इदमत्र बोध्यम्: दानस्य परस्वत्वजनकत्वे तत एव विक्रयादि वारणाय मूल्यग्र

हरणं विनेति व्यर्थम्॥ अथ प्रतिग्रह एव स्वीकारविशेषतया स्वत्वहेतुः स्वामिके स्वीकारस्य स्वत्वहेतुत्वकल्पना
त्॥ अत एव याजनाध्यापनप्रतिग्रहैर्ब्राह्मणो धनमर्जयेदित्यादिकं साधु संगच्छते अन्यथा प्रतिग्रहस्यैव फलत्वा
पत्तेः दानं तु स्वस्वत्वध्वंसमात्रं संजनयत्[illegible] परस्वत्वप्रयोजकमिति मतं तथापि तद्द्वैधपर्यंतदुपादा
नेप्युपेक्षायामतिव्याप्तेस्तस्या अपि स्वस्वत्वध्वंसद्वारा परस्वत्वप्रयोजकत्वात्॥ [illegible]तो दूरस्थ
पात्रमुद्दिश्य पतत्यक्तद्रव्यस्य प्रतिग्रहात्प्रागस्वामिकस्यानुद्देश्येन पुरुषेण प्रतिग्रहात्स्वत्वं स्या
दन्योद्देश्यकत्यागादेः प्रतिबंधकत्वे तु गौरवम्॥ न च तर्हि दरात्यागोदानमासुर एव स संप्रदा
नको हि त्यागो हरनं संप्रदानत्वं च इदं स्वत्वेत्यनुमतिप्रदर्शनद्वारा द्दानक्रियाहेतुत्वेन॥ न चास
न्निहितस्य तत्त्वमिति तत्तो दातुः स्वत्वनाश इति वाच्यम्॥ तीर्थे संकल्पितं द्रव्यं यदन्यत्र
प्रदीयते॥ दाता तीर्थफलं भुंक्ते प्रतिग्रहीता दोषभाक्॥ मनसा पात्रमुद्दिश्य भूमौ तो

कार

इति वाचस्पतिमिश्राद्युक्तेर्याग एव विशिष्टदेशप्रक्षेपोपहितो होम इ
यं विनिक्षिपेत् ॥ विद्यते सागरस्यांतो दानस्यांतो न विद्यते इत्यादिवाक्यान्नादृष्टदानसिद्धेः ॥ तस्मा
द्दानमेव स्वत्वजनकं प्रतिग्रहप्रागभावस्यापेक्षणीयत्वान्न प्रतिग्रहवैफल्यम् ॥ अत एव यस्मै दत्तं
तेनाप्रतिगृहीतेन दातुः स्वत्वनिवृत्तिः ॥ अन्यथा दत्तद्रव्यस्वीकारस्वरूपप्रतिग्रहत्वेन स्वीकर्तव्यद्रव्य
दानत्वेन वेति विनिगमकाभावाद्दानं स्वत्वध्वंसद्वारा प्रतिग्रहस्तु साक्षात्स्वस्वत्वजनकमुभय
थापि मूल्यग्रहणाद्विक्रेतिव्यर्थम् ॥ न च विक्रीतद्रव्यस्वीकारत्वं क्रयत्वं इत्यत्रापि विनिगमनावि
रहः ॥ मूल्यदानपूर्वकस्वीकारत्वस्यैव क्रयत्वात् ॥ विक्रयत्वस्य गौरवेणानिवेशात् किंच ॥
स्वस्वत्वध्वंसजनकेत्यपि व्यर्थम् ॥ अव्यावर्तकत्वात् ॥ अपि च अग्निप्रक्षेपो होम इत्ययुक्तं दे
वतोद्देश्यकस्वस्वत्वध्वंसफलकोस्य त्यागो यागः स एव प्रक्षेपावच्छिन्नो होम इति विवेकोक्तेश्च ॥ १९ ॥
अपि च ऋत्विजां त्यागो यजमानस्वत्वध्वंसः अनुमतदास्यादित्यागो हि दासस्य मिस्य

ति४
राम॰

तद्ध्वंसवद्भक्ततो दानत्वयागत्वहोमत्वा द्वयोर्मानस्प्रत्यक्षगम्यजातिविशेषाः॥ नन्वश्राद्धस्यापि त्रपैत्र्यया
यागत्वं ब्राह्मणापेक्षया दानत्वमिति विवेकेस्तयोः सांकर्यान्न जातित्वमिति वाच्यम्॥ श्राद्धस्यैतो
णात दुभयरूपत्वाद्भक्ततो श्राद्धस्य यागत्वमेवोद्देश्यपित्रादिस्वत्वाजनकत्वात ब्राह्मणस्यस्व
त्वमपि तु सार्वत्रिकं ब्राह्मणासंभवेपि श्राद्धे क्रियमाणे: पिंडाक्षगोजविप्रेभ्योत्यादिना अन्यत्रापि प्रति
प्रतिपत्तेः॥ विरुक्तं पञ्चते इत्यादेर्द्वितीयाचेप्युद्देश्यत्वं तत्वं च तस्य देमिस्यादेरे पञ्चानविषयत्व
देवतायाः स्वत्वोपगमे तु यागत्वं दानत्वव्याप्यं होमत्वं यागत्वव्याप्यमिति तु सर्वसिद्धं देवपूजा
दिकमपि यागएवेत्यलमप्रकृतेन॥ अतएव संसृष्टस्थलेऽसाधारणस्वत्वं न घटोत्तरं साधा
रणस्वत्वोत्पादात्तत्र सकलविशेषणासत्तितदाकलक्षणातिव्याप्तिरित्यपास्तम्॥ दानलजाते
स्तत्राभावात्परमात्रस्वत्वानुकूलत्वविशेषणात्संसृष्टिनिरास इत्यन्ये तत्रानेकस्वत्वनाशः

का॰ र॰
॥१०॥

10

किंतु परस्वत्वोत्पत्तिर्मैत्रेस्वत्ववतिस्वत्वोत्पत्तिस्तत्रस्येच्छायाउत्तेजकत्वादितिस्वस्वत्वध्वंसपूर्वकत्वविशेष
णादेवतन्निरास इत्यपरे॥ अदृष्टविशेषजनकत्वविशेषणान्नद्धाववृत्तिरित्यप्याहुः॥ एतेनविनि
मयेविक्रयादिलक्षणातिव्याप्तिरित्यपास्तम्॥ विक्रयत्वादेर्जातित्वान्मूल्यग्रहणातिरिक्तद्रव्यग्रह
णप्रयुक्तस्वस्वत्वध्वंसपरस्वत्वानुकूलस्त्यागोविनिमयइत्यन्येइत्यलमतिविस्तरेण॥ तच्चकर्मत्रि
विधम्॰ प्राप्यं॰ विकार्यं॰ निर्वर्त्यंच तत्रसंयोगादिरूपक्रियाजन्यफलशालिप्राप्यम्॥ यथाग्रामं
गच्छतीत्यादौग्रामादि यत्प्रकृतिसत्ताकमेवावस्थांतरमापद्यते तद्विकार्यम्॥ यथाकाष्ठंभस्मकरो
तिसुवर्णंकुंडलंकरोतीत्यादौकाष्ठादि॥ काष्ठादिपदलक्ष्यस्यकाष्ठावयवादेःसत एवभस्मा
दिसंबंधरूपावस्थान्तरप्राप्तेः॥ यत्तुक्रियायत्कर्मनाशकंफलंजनयतितद्विकार्यम्॰ यथाका
ष्ठंलुनातीत्यत्रकाष्ठमितितन्न॥ काष्ठपदलक्ष्यस्यकाष्ठावयवस्यकर्मतयाक्रियायास्तन्नाश

राम॰
॥१०॥

कत्वाभावात॥ अत्रछिकाष्ठपदस्यकाष्ठावयववोधकत्वंतेनारंभकसंयोगविरोधिविभागहेतुः कुठारादिव्या
पारोऽर्थः॥ तथाचकाष्ठावयववृत्तिताद्दशविभागावछिन्नव्यापारानुकूलकृतिमानित्यन्वयधी
रितिकाष्ठावयवस्यप्राप्यकर्मतैवावस्थांतरप्राप्त्यभावान्नविकार्यता॥ ओदनंपचतीत्यादावो
दनपदलक्ष्यओदनावयवः पच्यर्थोरूपादिपरावृत्त्यवछिन्नोतेजःसंयोगः तथाचधात्वर्थज
न्यफलशालित्वात्सतोऽवस्थांतरप्राप्त्याश्रयविधकर्मत्वमोदनावयवस्यैषामसंकीर्ण
स्यानमुक्तमेवेसहोषः॥ यत्क्रिययानिष्पाद्यतेतन्निर्वर्त्यम्॥ यथाकटंघटंवाकरोतीत्या
दौकटादि॥ अत्रकृतेः फलावछिन्नव्यापारावोधकत्वंयोगौणकर्मत्वम्॥ तच्चसाध्यता
ख्यकृतिविषयत्वम्॥ अतएववीरणांकरोतीत्यादिर्नप्रयोगोवीरणादावुपादानता

का॰च॰
॥११॥

स्वकृतिविषयतायाएवसत्वात्॥ यत्तुकुठारादिपरस्यकरणघवयवेवीरणादौनिरूढलक्षणाकठ
रेगौणकर्मत्वसंभवेपिकारकत्वासंभवात्। निरूढलक्षणायामुख्यप्रयोगापवादकत्वाच्चनवीरणंक
रोतीतिमुख्यप्रयोगइतितन्न॥ अतीतंघटंजानातीत्यादौघटादेरिवकठादेरपिगौणकार
कत्वसंभवात्॥ स्तोकंपचतीत्यादौहेतुक्रियाविशेषणपदोत्तरद्वितीयाविशेषणविभक्तिव
त्प्रयोगसाधुत्वायनामार्थधात्वर्थयोरभेदान्वयस्वीकारेतादात्म्यसंसर्गत्वात्तद
स्वीकारेतुविशेषणविभक्तिवदस्तुसा। अभेदार्थिकातस्यकारकत्वादितिदिक्॥ करणत्वं
चकारकांतरेऽव्यभिचरितयत्त्वेसतिक्रियाहेतुत्वंकारकांतरनिष्ठव्यापारसंक्रियाया
हेतुत्वाभावःस्यत्यंतार्थः कर्तृकर्मणोः कुठारादिकरणनिष्ठव्यापारद्धिदादिहेतु

राम॰
॥१२॥

व्यर्थ्यमणस्कताद रात्रिप्रहेतुत्वाभावान्नातिप्रसंग। (५ व्यापारस्य द्वारत्वस्यापि दत्त्वमिष्टमेवेत्यस्य व्यापारत्वं नो पातेर)

त्वान्नातिप्रसंगः॥ अधिकरणमपि कर्तृकर्मान्यतरव्यापारद्वारा क्रियाहेतुः चैत्रो गेहे स्थाल्या
मोदनं पचतीत्यादौ गेहस्थाल्याद्यधिकरणं कर्तृकर्मसंयोगद्वारा पाके क्रियानिमित्तं संप्रदा
नं स्वानुमतिप्रकारेणेन कर्तुरिच्छाद्वारा दाननिमित्तमपादानं पतनप्रतिबंधकसंयोगनाश
कपत्राद्विभागद्वारा पतनादिनिमित्तमिति नातिप्रसंगः॥ नचैवं कुठारादिकरणस्या
पि कर्तृकर्मनिष्ठव्यापारसापेक्षत्वादव्याप्तिः (एतन्मते चरमकारणस्यैव लक्ष्यत्वात्) अतए
व फलायोगव्यवच्छिन्नं कारणं करणमिति वदंति। वस्तुतस्तु व्यापारवत्त्वे सति कारणत्वं करणत्वम्।
नचैवं कार्यमात्रे ज्ञानादौ वा दृष्टस्य मनोयोगस्य व्यापारस्य सत्त्वादात्मनोपि करणत्वापत्तिः॥ इष्ट
त्वात् उपाधेयसंकरेपि कर्तृत्वत्वकरणत्वत्वादिरूपोपाधेरसंकरात् व्यवहारोपपत्तेः॥ इत्थं चा

५ कारणान्तरानिष्ठव्यापारसंबंधावच्छिन्नजनकत्वाभावस्य सत्त्वात्तथा कुठारादिव्यापारस्य पाकादौ व्यापार कुठारादेस्तादृ
त्वेनैव तथा कर्तृनिष्ठव्यापारसंबंध ... तथा कुठारादिव्यापारस्य ... स्यत्वात् ५ (१३

नुमितौ व्याप्तिज्ञानं करणं परामर्शो व्यापारत्वात्॥ वाक्यार्थबोधे च करणं पदज्ञानं पदार्थोपस्थितिस्तत्संयोगस्य व्यापारत्वा
त्प्रत्यक्षे चक्षुरादीनि करणानि इन्द्रियार्थसंनिकर्षो व्यापारः। श्रावणप्रत्यक्षे तु श्रोत्रं करणं श्रोत्रेण मनोयोगस्य व्यापारत्वान्न तु शब्दस्य। शब्दाभावप्रत्यक्षे तस्य व्यभि
चारात्॥ परे तु फलानुकूलकर्तृव्यापारवत्त्वं करणत्वं अस्ति च कुठारादौ छिदानुकूलकर्तृसंयो
गादिमत्त्वं॥ न चैवं गृहस्थाल्याद्यधिकरणस्यापि कर्तृव्यापारवत्त्वात्करणत्वापत्तिः॥ इष्ट
त्वात् स्थाल्या ओदनं साधयतीत्यादिप्रयोगात्॥ एवं गवा दानं साधयति ब्राह्मणेन साधय
तीत्यादिप्रयोगात् तत्रापि तदिष्टं चैव आत्मनाऽवैत्येवापवर्तीत्याद्यप्रयोगात्कर्तुः शरी
रस्य च वारणाय द्रव्यसमवायिभिन्नं यत्क्रियानुकूलकृतिमतो भिन्नत्वेन विशेषणं कृतिमत्त्वं
मत्त्वं समवायेनावच्छेदकतया च तेन शरीरव्युदासः। भिन्नस्येत्यनेन हस्तादिसंग्रहः। हस्ता ॥१२॥

पारि१

दिनाछिन्नतीत्यादिप्रयोगात् । व्यापारवत्वं च जनकतया तेन व्याप्तिस्मृत्यादिसाधारण्यमित्यतः ॥ अत्र पर
शुनाछिनत्तीत्यादौ निरुक्तं करणत्वं तृतीयार्थः आश्रयत्वेन प्रकृत्यर्थान्वितस्य तस्य धात्वर्थे निरूप
कत्वेनान्वयः । तथा च परशुनिष्ठकरणतानिरूपकछिदानुकूलकृतिमानिति वाक्यार्थ इति प्राञ्चः ॥
नव्यास्तु परशुनाछिनत्ति न दात्रेणेत्यादौ नञर्थान्वयानुरोधेन धात्वर्थनिरुक्तकरणत्वनिरूपितजन्य
त्वमेव तृतीयार्थः ॥ तस्य च निरूपितत्वेन प्रकृत्यर्थान्वितस्य आश्रयतया धात्वर्थेऽन्वयः ॥ इत्थं
च परशुनिरूपितजन्यत्वं दात्रनिरूपितजन्यत्वाभाववच्छिदायामन्वेतीत्यतः ॥ जटाभि
स्तापस इत्यादौ तृतीयोपलक्षणे । तत्वं चातद्व्यावृत्यनवच्छेदकत्वे सत्य तद्व्यावृत्तिसमानाधि
करणत्वं अस्ति च जटायाम् तापसव्यावृत्यनवच्छेदकत्वं शमदमादिमत्वस्यैव तदन्यूनानति
रिक्तवृत्तितया तदवच्छेदकत्वात् ॥ शमदमादिना तापस इति त्वपप्रयोगः ॥ विवक्षातस्तु

का॰च॰
॥१३॥

13

पाश्रयोगस्येष्टत्वेविशेषणतोपलक्षणसाधारणंवैशिष्ट्यमेवतृतीयार्थइति॥ अक्ष्णाकाणःपादेनखं
जइत्यादौयेनांगविकारइतिसूत्रेणतृतीयायेनांगेनांगिनोविकारोहानिराधिक्यं वा तदंगबोधकात्तृ
तीयेतिसूत्रार्थः॥ एवंचात्रतृतीयायावृत्तित्वमर्थः तच्चव्युत्पत्तिवैचित्र्यात्काणादिपदार्थैकदेशेवि
कारेऽन्वेतिकाणत्वंचवहिरवच्छेदेनचक्षुःशून्यगोलकवत्त्वंजातप्रसन्नांधस्याकाणत्वेतुचक्षुष्म
द्गोलकवत्त्वेसतीतिवाच्यम्॥ यद्वावहिरवच्छेदेनचक्षुःसत्वेप्युपघाताद्दर्शनवाक्षुषंतदुपहतगो
लकवत्त्वमेवकाणत्वं अक्षिपदंचचक्षुष्मद्गोलकपरंतथाचतादृशगोलकवृत्तिर्यच्चक्षुःशून्यत्व
मुपघातोवातद्विशिष्टगोलकवानित्यक्ष्णाकाण इत्यस्यार्थः॥ एवंखंजत्वंसंस्थानविशेषशून्य
पदवत्त्वम्॰ तथाचपदवृत्तिर्यत्तथाविधसंस्थानशून्यत्वंतद्विशिष्टवानितिपादेनखंज इत्यस्या
र्थःमुखवृत्तित्रिलोचनत्रयवानितिमुखेनत्रिलोचन इत्यस्यार्थः॥ परेत्वक्ष्णाकाण इत्यादाव

भवो

राम॰
॥१३॥

पदर

भेदे तृतीया॰ तथा च तादृशगोलकाभिन्नं पद्मस्तः शल्यमुपहतं वा तद्वानिति वाक्यार्थः॥ एवं चत्रि[illegible]लोच
न पदलोचनत्रयविशिष्टवत्परम्॥ तथा च मुखाभिन्नलोचनत्रयविशिष्टा नित्यर्थ इत्याहुः॥ धनेन कु
लमित्यादौ हेतुत्वे तृतीया ■ क्रियान्वयिनिरूपकत्वनत्वार्थिकात् तृतीया कर्तृकरणयोस्तृतीये
त्यनेन विहिता॰ हेत्वादिवितिसूत्रेणातुनामार्थेणान्वितहेतुत्वार्थिकेति विशेषः॥ पुत्रेण सहागतः इत्या
दौ तृतीयायाः कर्तृत्वमर्थः सहशब्दसमभिव्याहृतधात्वर्थः सहशब्दार्थः॥ एककालीनत्वसंबं
धेन तस्याः समभिव्याहृतक्रियायामन्वयः॥ तथा च पुत्रकर्तृकागमनसमानकालीनागमनकर्तृ
त्वर्थः॥ शिष्येण सह गुरुर्ब्राह्मणः पुत्रेण सह पिता सुहृद इत्यादौ सहार्थो ब्राह्मणादिसमानकाली
नत्वसंबंधेन ब्राह्मणादिपदार्थैकदेशेऽन्वेति॥ परे त्वत्र सहार्थः साहित्यं एकधर्मसंबंधः तृती
यार्थो वृत्तित्वं संख्यामात्रं वा तथा च शिष्यसाहित्यवान् गुरुर्ब्राह्मण इत्यादि बोध इत्याहुः॥

का॰ व॰
॥९३॥

१५

वदं तिर

एवं नैव सुगुजेरा सिंहीस्वपि तिनिर्भयं
स हराद्यपि स्तप्या चैवमूला नत्वसंबंधेन दशपुत्रकत्वेऽपि विद्यमानत्वविशेषणविद्यमानत्वा भयद्रसाद्यमा अन्वयबोधः॥२

सहैवदशभिः पुत्रैर्भारं वहति गर्दभी इत्यादौ पुत्रेषु भारवहनकर्तृत्वाभावेऽपि सहप्रयोगे विद्यमानेत्यध्याहा
राद्विद्यमानत्वम् अत एव विद्यमानसहार्थे तृतीयेति प्रदीपिका॥ धान्येन धनी गोत्रेण गार्ग्यः प्र
कृत्यादिभ्य उपसंख्यानात्तृतीया॥ अभेदे धान्याभिन्नधनवान् गोत्राभिन्नगर्गकुलोत्पन्नः सा
भिन्नरमणीयतावानित्यर्थः प्रकृतिपदस्य सादृश्यार्थत्वात् अभिरूपपदस्य रमणीयतावद
र्थत्वादित्यादि॥ कर्मणा यमभिप्रैति स संप्रदानमिति पाणिनिसूत्रं तत्क्रियाकरणीभू
तेन तत्क्रियाकर्मणा यमभिप्रैति फलभागित्वेनोद्देश्यीकरोति स संप्रदानमिति सूत्रार्थः॥
क्रियाकरणीभूतकर्मजन्यफलभागित्वेनोद्देश्यत्वं संप्रदानत्वमिति फलितं ग्रामं गच्छती
त्यत्र गमनकर्मग्रामजन्यसुखादिभागित्वेनोद्देश्यस्य चैत्रादेस्तत्क्रियायां संप्रदानत्वाभा
वात् तद्वारणाय करणीभूतेति॥ गमनक्रियायां ग्रामस्याकरणत्वान्न दोषः॥ दानदे

राम॰
॥१४॥

अतएव नरचास्मिन् स्वत्वनिवृत्तिदानसंप्रदानत्वापत्तिर्नवा चैत्रश्चैत्राय गां ददातीति प्रयोगप्रसंगः। १४

तु ईयादिकरणमिति प्रकृतसंगतिः स्वस्वपित्रादिस्वर्गोद्देशेन कृतदानादिस्थले दानजन्यफलभागि गो

त्वेनैव स्वस्वपित्रादिस्वर्गोद्देश्येन तु गोजन्यफलभागित्वेनेति न स्वस्वपित्रादेः संप्रदानत्वम्। अत

एव पित्रे गां ददातीति न प्रयोगः यदि वा द्वारतो गोरपि जन्यत्वं फले दत्तगोः स्वस्वपितृस्वर्गमुत्पा

दयिष्यतीति चाभिसंधिस्तदा फले कर्मजन्यत्वमहिमाद्वारकं गोदानं वस्तुतो धात्वर्थतावच्छेदक

त्वेन फलविशेष्यस्वस्वपितृस्वर्गादिकं तु न तथेत्यदोषः। इत्थं च विप्राय गां ददातीत्यादौ संबं

धित्वेन परेच्छाविषयत्वं चतुर्थ्यर्थः। चैत्रश्चैत्राय गच्छतीत्यादि वारणाय परेति। स्वत्वं धात्वर्थ

तावच्छेदकफलेऽन्वेति वृत्तित्वं द्वितीयार्थः। तथा च विप्रसंबंधित्वेन परेच्छाविषयगोवृत्तिस्वस्व

त्वध्वंसपरस्वत्वानुकूलत्यागानुकूलकृतिमानित्यन्वयधीः। यत्तु तज्जन्यफलप्रकारकेच्छोपू

र्वकत्वं चतुर्थ्यर्थः मुख्यत्वं वैचित्र्याद्युत्तरदेकदेशो जन्यत्वे कर्मणो गवादेर्निरूपकतासंबंधेन

२ यत्वस्तुतः परेति न देयं गमनक्रियायां ग्रामजन्यत्वा... तथा चैत्रसंबंधित्वेनेच्छाविषयत्वस्थले ध्वंसगो

का० व०
॥१५॥
15

तत्र

न्वयः॥ तथा च विप्रविषयकगोजन्यफलप्रकारकेच्छापूर्वकगोवृत्तिस्वस्वत्वध्वंसपरस्वत्वानुकूलत्यागा
नुकूलकृतिमानित्यन्वयधीरिति तत्त्वम्॥ गोजन्यफलस्य प्रकृते स्वत्वरूपतया विप्रविषयिकायां गोजन्य
फलप्रकारकेच्छातत्पूर्वकत्वस्य दाने ऽसंभवात्तादृशेच्छाया एव दानत्वादिति दिक्॥ एवं वृक्षायोदक
मासिंचतीत्यादौ संयोगानुकूलद्रवद्रव्यक्रियानुकूलव्यापारो धात्वर्थः॥ वृत्तित्वेनेच्छाविषयत्वं चतु
र्थ्यर्थः स च धात्वर्थतावच्छेदकसंयोगान्वयी॥ द्वितीयार्थो वृत्तित्वं तादृशद्रवद्रव्यक्रियान्वयि तथा
च वृक्षवृत्तित्वेनेच्छाविषयसंयोगानुकूलद्रवद्रव्यक्रियानुकूलव्यापारानुकूलकृतिमानित्यन्व
धीः॥ अत्र क्रियांतस्य धात्वर्थत्वे वृक्षस्यैकर्मत्वस्यान्न तु जलस्य क्रियाया वृक्षापेक्षयैव परसमवेत रामः
त्वात॥ न चैवं पयसा वृक्षमासिंचतीति न स्याद्धात्वर्थतावच्छेदकक्रियाया वृक्षावृत्तित्वादिति वाच्य ॥१५॥
म्॥ अत्र क्रियांतस्यैव धात्वर्थतया धात्वर्थतावच्छेदकसंयोगस्य वृक्षवृत्तित्वाद्द्रवद्रव्यसंयोग

एवात्र धात्वर्थ इति तु न युक्तं तर्हि फलावच्छिन्नव्यापारावबोधकतया धातोरकर्मकत्वं धात्वर्थतावच्छेदकफलाश्रया

लित्वाभावाद्दुहादेरकर्मकत्वं व स्यात् । अत्र अजां ग्रामं नयतीतिवद्द्विकर्मकत्वं स्यादिति नाशंक्यं क्रियां

तार्थत्वे फलद्वयाभावात् नादृशक्रियानुकूलव्यापारार्थत्वे क्रियायामेव द्वितीयार्थवृत्तित्वान्वयात् क्रि

यावच्छेदकसंयोगे तु वृत्तित्वादिवत्तु र्थार्थस्योद्देश्यत्वस्यैवान्वयेन द्वितीयार्थस्य व्युत्पत्तिवैविचित्र्या

त्तुर्थीसमभिव्याहृतस्यैव सिद्धधातोस्तादृशव्यापारार्थत्वात् । अत एव अजां ग्रामं नयतीत्य

त्र ग्रामस्य न संप्रदानत्वम् । अत्र हि संयोगावच्छिन्नक्रियानुकूलव्यापारः प्रेरणादिर्धात्वर्थः ।

द्वितीयाद्यर्थो वृत्तित्वं संयोगे ग्रामपदोत्तरद्वितीयार्थः । क्रियायामजापदोत्तरद्वितीयार्थो

न्वेति ॥ तथैव व्युत्पत्तेः ॥ तादृशफलभागित्वेन ग्रामादेरनुद्देश्यत्वान्न संप्रदानता तथोद्देश्य

त्वविवक्षायां तु ग्रामायाजां नयतीति भवत्येवेति दिक् ॥ परं तु त्यज्यमानद्रव्यस्वत्वभागित्वेनोद्देश्य

तादृशफलभागित्वेनोद्देश्यत्वेऽपि

का० व०
॥१६॥
16

त्वं संप्रदानत्वं त्यागोऽत्र विलक्षणो ग्राह्यस्तेन विक्रयादौ क्रेत्रादेर्न संप्रदानत्वं कर्मणा दानकर्मणा यम
भिप्रैति तत्संप्रदानमिति कर्मणोत्यादि सूत्रार्थः॥ अत एव संप्रदीयतेऽस्मै इति संप्रदानसंज्ञा
प्यन्वर्थ्या रजकादौ पित्रादेर्न स्वत्वभागित्वेनोद्देश्यत्वं किंतु प्रीतिभागितयेति संप्रदानत्वाभावेन
संप्रदाने चतुर्थ्यसंभवान्नमः स्वस्तीत्यादिना सूत्रांतरेण तत्र चतुर्थी एवं कृष्णायोदकमासिं
चतीत्यादौ वस्त्रादौ संप्रदानप्रयोगो गौणश्चतुर्थी प्राप्यर्थः॥ अत एव रजकाय वस्त्रं मुंचति मि
त्राय दूतं प्रेषयतीत्यादौ विभागानुकूलक्रियानुकूलव्यापारे मोचनम्. संयोगानुकूलक्रियानुकू
लव्यापारः प्रेषणमिति धात्वर्थतावच्छेदकक्रियारूपफलशालित्वेनानुद्देश्यत्वा[illegible]
[illegible] धात्वर्थतावच्छेदकफलोद्देश्यत्वाभावेपि चतुर्थी॥ [illegible]कादि[illegible]
पल्लवादि शास्त्रजन्यदुःखादि दूतजन्यवार्ताज्ञानादिफलशालित्वेनोद्देश्यत्वमेव वस्त्रादेर्यत्ता

राम०
॥१६॥

अ०

स्पयस्व वृक्षादिपल्लवोद्देश्यकसंयोगा

स्वितु यत्रियार्थं[illegible]नुकूलइवजव्यक्रियानुकूलव्यापारानुकूलकृतिमान्शत्रुदुःखोद्देश्यकास्त्रविभागा
वच्छिन्नक्रियानुकूलव्यापारानुकूलकृतिमानमित्रवार्त्तज्ञो नोद्देश्यकद्रुतगमनावच्छिन्नक्रियानुकू
लव्यापारानुकूलकृतिमानितिबोधः॥ न च गुरुप्रीत्युद्देशेन गुरुपुत्राय यच्छे गुरवे गां ददातीतिस्या
त्। तथा विवक्षायामिष्टत्वात्॥ अत एव रजकसंबंधित्वस्य तात्पर्यविषयत्वे रजकस्यैव वस्त्रं ददाती
तिप्रयोगः। वस्त्रजन्यफलभागितयोद्देश्यत्वस्य तत्त्वे तु रजकाय वस्त्रं ददातीति प्रयोगः॥ वस्त्रजन्य
फलभागित्वस्य तत्त्वे तु रजकाय वस्त्रं ददातीत्येव भवति॥ न चैवं प्राड्विवाकाय पिपित्रादेः प्रीतिभागि
तयोद्देश्यत्वात्संप्रदानत्वं तु चैवैवोपपत्तेर्नमः स्वस्तीत्यादिसूत्रांतरं व्यर्थम्॥ यत्किं विक्रियाजन्य
कर्मफलभागित्वेनोद्देश्यत्वस्यैव गौणसंप्रदानत्वरूपतया नेमः पदार्थस्य क्रियात्वाभावेन
पथ्यकूसूत्रप्रणयणोन्म[illegible]परोचितकलहः वैरूप्याय प्रतंधारतीत्यादौ तु नारदाद्देः सं

का॰च॰ ॥१७॥
17
स्याकुः

प्रदानत्वं किंतु स्वत्वध्वंसावधित्वेष्टत्वमस्तीति सत्राभ्यां संबंधमात्रे चतुर्थी। तथा च चतुर्थ्याः संबंधोर्थः धातु
नारूढविसरखन्यात्तेन विषयत्वं बोध्यते इति नारदस्यरूढिविषयः कलहस्याध्यार्थः पुनर्दाने संगीकृत
द्रव्यग्रहणं धारणं वे श्यपस्यघृतकर्मकताद्दश्यग्रहणाश्रय इत्यर्थस्यार्थः। संप्रदानस्य कारकत्व
धात्वर्थतावच्छेदकफलनिष्पादकत्वेन दत्त्वेनानुमतिप्रकारेणेनैव कुं रिद्रामुत्याद्य दानसंपा
दनेनैवेति। परेतु त्यागजन्यस्वत्वजनकस्वीकारवत्वं संप्रदानत्वं आद्ये दोपि प्रादेर्नस्वीकारे स
इयमां दद्यादित्यादावपि गोर्यासंप्रदानत्वमुद्देश्यरूपमित्याहुः। परकीयक्रियाजन्यविभागा
श्रयत्वमपादानत्वम्। वृक्षात्पर्णं पततीत्यादौ पर्णाद्यादेरपादानत्ववारणाय परकीयेति। अप
यं वृक्षाद्विभागजनकत्वमन्योन्याभावप्रतियोगितावच्छेदकत्वं चार्थः। विभागे अन्योन्या
भावेचवृक्षोऽन्वेति तथा च वृक्षवृत्तिविभागजनकवृक्षत्वचान्योन्याभावप्रतियोगितावच्छेदक

दातु
त्व४
रामः
॥१७॥

कपतनाश्रयः पत्रमिति वाक्यार्थः ॥ तथाच ध्रुवमपायेऽपादानमितियत्रापिनिरस्तम् अपायेविभागे
ध्रुवंनिश्चलंप्रकृतपंचम्यर्थविभागजनकत्वान्वयिक्रियाशून्यमितितदर्थः धावतोऽश्वात्पतितइ
त्यादावश्वादेस्तद्विभागहेतुक्रियावत्वेपिप्रकृतपंचम्यर्थविभागजनकत्वान्वयिनीयापतनक्रिया
तच्छून्यत्वमव्याहतंस्पंदजन्यविभागाश्रयत्वेनवृक्षादेरपादानत्वेवृक्षात्पर्णंस्पंदतेइत्यपि
स्यात् अतः क्रियेतिसकर्मकधात्वर्थपरम् व्याघ्राद्बिभेतीत्यादौतुपंचमीनापादानत्वेकिंतु
हेतुत्वेइत्यग्रेवक्ष्यतेधात्वर्थतावच्छेदकत्वेनविभागोविशेष्यस्तेनवृक्षंत्यजतिखगइत्यादौवृ
क्षादेर्नापादानत्वम् ॥ यत्तुविभागावच्छिन्नक्रियायास्त्यजधात्वर्थतयाविभागोविभजतिविशेषक्रि
याजन्यत्वाभावान्नातिप्रसंगइतितन्न ॥ तदर्थः संयोगावच्छिन्नक्रियायाः पतत्यर्थतयाऽसंभ
वापत्तेः विभागेफलोपलक्षितव्यापारजन्यत्वंतूभयत्रतुल्यमितिदिक् ॥ वृक्षाद्विभजतेइत्या

का॰ व॰
॥१८॥

१८

रोविभागावधित्वमपादानत्वम्॰ अवधित्वं स्वरूपसंबंधरूपं पंचम्यर्थः॥ अपाये विभागे ध्रुवमवधीभू
तमपादानमित्यपि पाणिनिसूत्रार्थः। तथा च वृक्षनिष्ठावधिता निरूपकविभागाश्रयः पर्णमि
त्युक्तवाक्यार्थः। नैवं स्वस्मात् विभजते इत्यपि स्यात्तस्य प्रतियोगिकत्वविशिष्टसंयोगस्यैव स्वा
वधिकत्वविशिष्टविभागस्यापि स्वस्मिन्नभावात्॥ इत्थं चापादानपदं पंचमीनानार्थमेवे
ति बोध्यम्॥ धावतोऽश्वात्पततीत्यादावपि अवधित्वमेव पंचम्यर्थ इति कश्चित्तु व्याघ्राद्वि
भेतिचोरात् त्रायत इत्यादौ पंचमी नापादाने किंतु भीत्रार्थानां भयहेतुरिति सूत्रेणानु
शिष्टहेत्वर्थिका धातोश्च यथायथं भयं भयाभावश्चार्थः पंचम्यर्थहेतुत्वं धात्वर्थे भये धात्वर्थतावच्छेदके च
भये ऽन्वेति आश्रयत्वं व्यापारश्च यथायथमाख्यातार्थः। तथा च व्याघ्रहेतुकभयाश्रय इत्यादेश्चोरहेतुक
हेतुकभयाभावानुकूलव्यापारवानित्यं तस्यार्थः॥ इत्थं च रंगाद्बह इत्यादावपि वहे तु पंचम्येवो पय

राम॰
॥१८॥

त्रौपपकूसूत्रंघ्रपंचार्थमिति वोध्यम्॥ एवं कूपादंधं वारयतीत्यादौ पंचम्याः अधःसंयोगानुकूलक्रियारूपं
पतनं द्वितीयाया धात्वर्थव्यापारेन्वितत्वंतैरेवम्। धातोर्विरोधिव्यापारोऽर्थः। तथा चांधकर्तृककूपनिष्ठा
धःसंयोगानुकूलक्रिया[illegible] विरोधिव्यापारविषयककृतिमानिति वाक्यार्थे नियुक्तो यत्रांधविभिन्नाणास्या
पि निर्खंज कूपे परमाणवादेरप्यधःसंयोगो मानाभावेनासिद्धस्तत्रासंभवात्॥ अत एव द्वितीयायाः
पतनं पंचम्या धात्वर्थतावच्छेदकाभावान्वयित्वं धातोरभावानुकूलव्यापारोऽर्थः। तथा च कूपकं
त्रि अंधपतनाभावानुकूलव्यापारविषयककृतिमानित्यर्थोऽप्यपास्तः॥ यदंधस्य पतनमप्रसिद्धं
तत्रासंभवात् किंतु धातोरभावानुकूलव्यापारः पंचम्यास्त्वित्वं द्वितीयायाः प्रतियोगित्वमनुयोगित्वं वा
धात्वर्थतावच्छेदकीभूताभावान्वितमर्थः। अभावस्य कूपादिसमभिव्याहारात्पतनादिनातज्जन्याधः
संयोगादिना वासंवंधेन॥ तथा च कूपवृत्तिसंयोगप्रतियोगिकाभावानुकूलव्यापारविषयकयत्न

५८२

का॰ व॰
॥१९॥
19

वानितिवाक्यार्थः ॥ एवमेतस्मात्सविषान्नादमुंमित्रंवारयतीत्यादौ यत्सविषान्नस्य मित्रस्य च भोजनमप्र
सिद्धं तत्रापि भोजनादिसंबंधेन सविषान्नवृत्तिमित्रप्रतियोगिकाभावानुकूलव्यापारविषयकयत्नवा
नित्यन्वयधीः ॥ परे तु कूपादधमित्यत्र सविषान्नादमुमिस्यत्र च धातोः पतनमाद्ये द्वितीये भोजनमुभ
यत्राभावानुकूलव्यापारश्चार्थः पंचम्या आद्ये ऽवच्छिन्नत्वं द्वितीये कर्मत्वमुभयत्र द्वित्वं च द्वितीयायाश्च
कर्तृत्वमर्थः ॥ धात्वर्थतावच्छेदकीभूते ऽभावे धात्वर्थपतनादेरधिकरणत्वेन द्वित्वावच्छिन्नस्य पंच
म्यर्थद्वितीयार्थोभयस्य प्रतियोगित्वेनान्वयो व्युत्पत्तिवैचित्र्यात् ॥ तथा च पतनसामान्येयः कूपाव
च्छिन्नत्वांशकर्तृत्वोभयाभावस्तदनुकूलव्यापारविषयकयत्नवानित्याद्यस्य ॥ भोजनसामान्येयः
सविषान्नकर्मकत्वमित्रकर्तृकत्वोभयाभावस्तदनुकूलव्यापारविषयकयत्नवानिति द्वितीयस्या
र्थः ॥ आकाशेन पश्य पतितघटश्चैत्रो वेत्यादौ द्वितीयया विषयित्वं लक्षणया घटादिवृत्तित्वं द्वित्वं च बोध्य

राम॰
॥१९॥

तेधातुनालौकिकविषयित्वावछिन्नचाक्षुषप्रसङ्गंतथाप्यलौकिकप्रत्यक्षसामान्येयत्र्प्रा...काराविषयित्वघ्युद
दित्वेनैलोभयाभावस्तत्प्रतियोगिनिरूपकोद्युत्वइत्यर्थः॥आकाराविषयकचाक्षुषोपनीतभानेपिलौकिक
विषयित्वावछेदेनाकाराविषयित्वनैरवछिन्नत्वोभयाभावसत्वान्नदोषः॥एवमन्यत्राप्यप्रसिद्धस्य
लेवोध्यमित्यर्थः॥तिष्ठवतोगंगाप्रभवतीत्यादौविषयंतमप्याहतुत्वंधातोरूत्यत्तिरर्थइत्ययुक्तंतत्तिजादि
कर्तृइत्यतएवोपपत्तेभुवःप्रभवइतिस्त्रविषयेप्रसंगात्किंतुप्रकर्षेणभवनंप्रकाशआद्यवहिःसंयो
गरूपोधात्वर्थःवहिःपदार्थःप्रकृतेभुरवंडपंचम्यर्थःसंयोगध्वंसाव्यवहितोत्तरक्षणवृत्तित्वंआरव्या
तार्थआश्रयत्वम्॥तथाचहिमालयसंयोगध्वंसाव्यवहितोत्तरक्षणसाद्यपृथिवीसंयोगाश्रयत्ववती
गंगेत्यर्थः॥वैकुंठात्काशीतोवागंगाप्रभवतीत्यत्रयोगाद्व्यवहितेतिआद्येतिचवैकुंठसंयोगध्वंसा
व्यवहितोत्तरक्षणेभूसंबंधस्यकाशीसंयोगध्वंसाव्यवहितोत्तरक्षणेआद्यस्यतस्याभावादहेव॥

का॰ व॰ ॥२०॥ २०

वल्मीकाग्रात्प्रभवति धनुःखंडमाखंडलस्येत्यादावप्येवमेव तत्रवर्त्तिःपदार्थो वल्मीकाग्रोद्देश इति विशेषः
कृष्णात्पराजयते शिशुपालः अध्ययनात्पराजयते बाल इत्यादौ धातोरसन्निहितत्वात्पंचम्याः कर्मत्वमुख्या
तस्याश्रयतार्थः श्रीकृष्णं न सहते अध्ययनं न सहते इति विवरणात् ॥ असहिष्णुतावच्छेदकविशेषोऽ
भिभवाशक्यत्वज्ञानं वा ॥ तथा च श्रीकृष्णविषयकाभिभवाशक्यत्वज्ञानवान् इत्याद्यस्य अध्ययन
विषयकाभिभवाशक्यत्वज्ञानवानित्यर्थः ॥ विप्राद्धनमादत्ते इत्यादौ पंचम्याधेयधेयत्वविनियो
गोऽर्थो न तु स्वत्वं चौराद्धनमादत्ते इत्यादौ चौरस्य स्वत्वाभावेन तदसंभवात् धातोरपि धेयत्वविनि
योगफलकस्वीकारोऽर्थो न तु स्वत्वजनकस्वीकारः विप्राद्धनमादत्ते चौरादित्यादौ चौरस्य तदसंभवा
त्पंचम्यार्थः स्वत्वविनियोगोऽव्यवहितोत्तरत्वसंबंधेन धात्वर्थतावच्छेदके विनियोगेऽन्वेति अव्यवहि
तोत्तरत्वं च स्वसमानविषयकपुरुषांतरीयविनियोगाव्यवहितत्वं तद्भिन्नत्वं तेन परंपरातः प्रतिग्रहीत्रा
विप्राद्धनमाददते इति न प्रयोगः ॥ एवं च विप्रीयधेयत्वविनियोगाव्यवहितोत्तर

रा॰ म॰ ॥२०॥

धनवृत्तित्यागेच्छविनियोगफलकस्वीकारवानित्यर्थः ॥ अधर्माज्जुगुप्सते इत्यत्र पंचम्याः कर्मत्वं धा
तोर्निंदापूर्वत्यागो वा धर्मेर्निंदतीत्यर्थः अधर्माद्विरमतीत्यादौ धातोः करणानंतरमकरणं पंचम्याः
कर्मत्वमर्थः स च करणेऽकरणे वान्वेति तत्पत्त्वाधर्मं पुनर्न करोतीत्यर्थः धर्मात्प्रमाद्यतीत्यादौ पं
चम्या विषयत्वं धातोरनवधानमाख्यातस्याश्रयत्वमर्थः धर्मविषयकावधानाभावाश्रय इति वाक्या
र्थः ॥ उपाध्यायादधीते शिष्य इत्यादौ धातोः स्वविषयकप्रत्यक्षाविरोधिव्यापारः पंचम्याः संबंधित्वं
धात्वर्थतावच्छेदकप्रत्यक्षान्वितमाख्यातस्य कृतिरर्थः उपाध्यायसंबंधिस्वविषयकप्रत्यक्षाविरो
धिव्यापारानुकूलकृतिमान् शिष्य इति वाक्यार्थः दंडाद्घटः धूमाद्वह्निमानित्यादौ तु पंचमी नापादा
ने क्रियायोगाभावात् किंतु जनकत्वज्ञापकत्वरूपे हेतुत्वे जन्यत्वज्ञाप्यत्वरूपे हेतुमत्त्वे वा हेताविति सूत्रेण
नुशिष्यते । न चैवं जनिकर्तुः प्रकृतिरिति सूत्रवैयर्थ्यं कामात्क्रोधोऽभिजायते इत्यादावप्युत्प
त्तिनिरूपितहेतुत्वार्थकपंचम्या हेताविति सूत्रेणैव संभवादिति वाच्यम् ॥ उत्पत्तेर्हेतुकत्वे

का॰ व॰
।।२१।।

पिसर्वं धिकत्वस्य व्यापारात् उत्पत्तिरूपधात्वर्थनिरूपितस्वरूपसंबंधस्य हेतुत्वात्मकतया हेतावि
तिसूत्रेण तृतीयैकवचनस्यासंभवादिति ।। अपि च [illegible]त्वं च न धर्मसंबंधः संयोगादिरूपसंबं
धस्य द्विष्ठतया वदरादेरपि कुंडाद्याधारतापत्तेः ।। न च स्वधर्मसंबंधोऽधिकरणत्वं कुंडादिकं च न वदरा
दिधर्म इति वाच्यम् ।। स्वधर्मत्वस्य स्वाधेयत्वरूपतया स्वाधेयत्वस्य स्वनिष्ठाधिकरणतानिरूपक
त्वरूपत्वेनान्योन्याश्रयप्रसंगात् ।। नाप्युत्पत्तये स्थितये ज्ञप्तये वापेक्षणीयमधिकरणमुत्पत्तयेऽपे
क्षणीयं [illegible] कार्यस्य समवायिकारणं [illegible] स्थितये घटादेर्भूतलादि ज्ञप्तये आत्मादेः समवायिस
मवायादेः स्वरूपसंबंधीति वाच्यम् ।। अपेक्षणीयत्वस्य कारणत्वरूपत्वे असमवायिकारणा
दावतिव्याप्तेः ।। समवायिकारणत्वं तु घटत्वादिज्ञप्तेर्घटादौ न संभवति ।। नापि तद्भिन्नत्वे सति
पतनप्रतिबंधकसंयोगवन्मूर्तत्वं पतनवन्मूर्तस्याधिकरणत्वम् ।। व्रजं गजादिधारक

राम॰
।।२१।।

संयोगाश्रयेश्वरवारणाय मूर्त्तत्वमुपात्तम्॥ पतनशून्यमूर्त्तस्य तु विलक्षणतत्संयोगादिमत्वम्। तेन कु
स्यचित्सतनाऽप्रसिद्धावपि नाव्याप्तिः॥ गुणादेस्तत्समवायित्वं समवायादेस्तु तत्स्वरूपसंबंधित्वं एवं
परंपरासंबंधेनापि वक्तव्यमिति वाच्यम्॥ अननुगमात्समस्यानाना पत्नस्यान्यापाद्यत्वात् किं
तु प्रतियोगित्वादिवदधिकरणाकारप्रतीतिसाक्षिकमधिकरणत्वं स्वरूपसंबंधरूपमति
रिक्तं वेत्यन्यदेतत्। एवमाधेयत्वमपि वाच्यम्। इयं च गेहे स्थाल्यामोदनं पचतीत्यादौ पच्य
र्थोऽधःसंतापनमधोवह्निसंयोगानुकूलः काष्ठवह्न्यादिव्यापारस्तस्यैकैः॥ पत्न्यर्थोऽपि तेन सं
योग एव पाकजरूपमिश्रीत्यादिव्यवहारात्तदन्वये॥ ऽभयद्यपि गेहादेः साक्षात्तदधिकरण
त्वाभावात्कर्तृकर्मान्यतरद्वारा क्रियाश्रयत्वं क्रियाधिकरणत्वं सप्तम्यर्थः॥ तत्र तु कर्त
र्तृकर्मव्यवहितमसाक्षाद्द्वारयत्क्रियाम्॥ उपकुर्वत्क्रियासिद्धौ प्रोक्तोऽधिकरणं स्मृतमि

ति॥ वस्तुतः परंपरया क्रियाश्रयत्वमात्रं सप्तम्यर्थः। अत एव प्रांगणस्थेन दीर्घदंडादिना बालस्य
द्वारादूतलमध्ये पाककरणेन गृहस्य कर्तृद्वारा क्रियानाश्रयत्वेपि गृहे पचतीति प्रयोगः। एवं हि वै
त्रादेः साक्षात्पाकगमनादिक्रियाश्रयत्वेपि वृक्षे पचति चैत्रे गच्छतीत्याद्यप्रयोगात् परंपर
येत्युक्तम्॥ न चैवं क्रियाश्रयत्वस्यैव सप्तम्यर्थत्वे क्रियायोगं विना भूतले घट इत्यादिप्रयोगो
न स्यादिति वाच्यम्॥ इष्टत्वात्॥ नहि क्रियारहितं वाक्यमस्तीति शाब्दिकाः॥ वस्तुतस्त्वधि
करणत्वमात्रमाधेयत्वमात्रं वा सप्तम्यर्थः क्रियायाः शब्दप्रत्यर्थत्वात् सर्वत्र क्रियायामन्वेति
तत्र कारकत्वव्यवहारः॥ अत एव भूतले घट इत्यादिवाक्याद् घटाद्यवबोध इति नैयायिकाः॥
भूतलनिष्ठाधिकरणतानिरूपको घट इत्याकारको बोधो निष्ठत्वं निरूपकत्वं च सं
सर्ग इति प्राञ्चः॥ एवं सति निरूपकत्वसंबंधस्य प्रतियोगितानवच्छेदकत्वाद् भूतले न घटः

रूपाद्येन अर्थस्यान्वयासंभवाद्भूतलनिरूपिताधेयताश्रयो घट इत्यन्वयबोधः ॥ निरूपितत्वमाश्रय
त्वं संसर्ग इति तु नव्याः ॥ निमित्तसप्तम्यर्थो निमित्तत्वं तच्चोद्देश्यत्वं फलत्वेन फलवत्त्वेन वेद्यादिवि
षयत्वरूपं तत्राद्यं चर्मणि द्वीपिनं हन्तीत्यादौ चर्मनिष्ठनिमित्ततानिरूपकधात्वर्थस्य फलत्वात् द्वितीयं चर्म
णि द्वीपिनं हन्तीत्यादौ चर्मादेः सिद्धतया स्वत्वरूपफलवत्त्वेनैवेष्टत्वात्तत्प्रयोज्यत्वेन धात्व
र्थे ऽन्वेति तथा च चर्मशाकनिष्ठनिमित्ताप्रयोज्यधूमकरणाश्रयः चर्मविषयकस्वत्वप्रकारकेच्छा
प्रयोज्य द्वीपिकर्मकहननानुकूलकृतिमानिति क्रमेण बोधः ॥ एवं सीम्नि पुष्कलको हत इत्या
दावपि पुष्कलको गंधमृगः सीमा तस्यांडकोषक इति कोषः ॥ सा च निमित्तात्कर्मसंयोगे इत्य
नुशासनाद्धातूक्तकर्मप्रकारकबोधजनकधातुयोगे प्रयुज्यते तादृशबोधजनकता च स
कर्मकस्य धातोः कर्मबोधकपदयोगेन चर्मणि द्वीपिनं हन्तीत्यादावकर्मकस्य तु कर्मविशिष्ट

स्वार्थशब्दार्थयथाऽविधारजनीक्षयेषदुदेतीत्यादौउदेतीत्यस्योदयगिरिशिखरसमारोहतीत्यर्थो
त। अत्र रजनीक्षयस्यसूर्योदयाऽन्यत्वेपि तन्निमित्तत्वं ज्ञानविशेषत्वेनोद्देश्यतया तेनल
कानांरजनीक्षयज्ञानार्थंयदुदेतीत्यर्थइत्येके॥ रतद्रूपवत्तिर्यावद्दवैरश्मिसंसर्गा
भावविशिष्टकालस्यरजनीत्वात्सूर्योदयेतु इस्मृत्योहिनतत्त्वागभावनाशोविशिष्टका
लनाशात् इजनीक्षयेघाग्रयोऽन्यत्वंसूर्योदयेऽस्तमित्यन्ये॥ शरदिपुष्यंतिसप्तच्छदाः
सा शरदुत्पत्तिरपिसप्तच्छदपर्णः शरदुत्पत्तिकपुष्पाश्रयाःसप्तच्छदाइतिवाक्यार्थः॥ नचशर
दुत्पत्तिकपुष्पाश्रयेचंपकादावपितथाप्रयोगःस्यादितिवाच्यम्॥ सप्तच्छदस्यपुष्प
यत्वेनचेतुल्यचित्तिरवैघतयापुष्पेष्वपिसप्तच्छदत्वत्तिलाभात्तत्पक्षेदनशरदुत्पत्ति

कत्वस्य व्युत्पत्तिसिद्धत्वाच्चंपकादिपुष्पत्वावच्छेदेन च शरदृत्यन्तिकत्वाभावेन तथा प्रयोगाभावात् ॥
धातोरेव वासस्तत्पदीयपुष्पत्वेन लक्षणेति दिक् ॥ सतिसप्तम्याः ॥ समानाधिकरणमर्थः
गुणकर्मान्यत्वे सति सत्त्वादित्यादिति गुणकर्मान्यत्वसमानाधिकरणसत्त्वबोधात्रैवं
त्रैकालिकं च विद्वैधिकं तत्राद्यं समानकालीनत्वपर्यवसन्नं यथा गोषु दुह्यमानास्वागतो
दुग्धास्वागत इत्यादौ ॥ अथ सप्तम्यर्थे समानकालीनत्वे दोहनमात्रस्य निरूपकत्वे नान्व
यः ॥ महिष्यादिदोहनसमानकालीने तथा प्रयोगाभावात् ॥ नापि गोदोहनस्य गोदोहनत्वे
न धातोरनुपस्थितेः किंतु गोविशेषणकर्मताविशेषणस्य दोहनस्य ॥ इत्थं च तादृशदोह
नसमानकालीनातीतगमनानुकूलकृतिमानित्यादिबोधः ॥ दुग्धास्वागत इत्यादौ तु

नतच्चाऽन्वय आगमनकाले दोहनस्यातीतत्वं तथा दोहनकालीनत्वं तस्यागमनेवाधात्किंतु वर्त्तमानध्वंसप्रतियोगि
दोहनकर्मासु गोष्विति दुग्धासु गोष्विति संतार्थः। तादृशदोहनविशेषणप्रतियोगित्वविशेषणध्वंस
स्य समानकालीनत्वमागमने भासते। तथा चेदृशवर्त्तमानध्वंसकालीनागमनानुकूलकृतिमानि
ति द्वितीयवाक्यार्थः। एवं गोषु दोहनीयास्वागतहूत्या इव पितादृशप्रतियोगित्वविशेषणप्राग
भावस्य समानकालीनत्वं भासते। ध्वंसप्रत्यर्थे समानकालीनत्वे प्रकृतार्थस्य गौरवेणान्वया
पत्तिः। तादृशदोहनकर्मत्वविशिष्टगोस्तादृशस्वविशेषणदोहनाधाश्रयत्वसंबंधेन कालेऽ
न्वयात्। इष्टुवोच्यम्। यस्य च भावेन भावलक्षणमिति सूत्रस्य क्रियया क्रियांतरं लक्ष्यते
इति व्याख्यानात् क्रिययोः सामानाधिकरण्ये सप्तमी तत्सूत्रेणानुशिष्टेति गुणकर्मणोर
त्वे सति सत्त्वादिप्रत्ययेनामार्थयोः सामानाधिकरण्ये सप्तमी न युक्ता तथापि गुण

कर्मान्यत्वेसतिसत्वादित्यभियुक्तप्रयोगदर्शनात्सूचत आख्यानयोर्भावक्रियापदेध
र्ममात्रपरे॰तथाचयस्यधर्मैणधर्मांतरंनिरूक्तंस्वसामानाधिकरण्येनप्रतिपाद्यतेत
त्रसप्तमीतिसूत्रार्थइत्यदोषः॥ ॥इतिमहामहोपाध्यायश्रीजयरामन्यायपंचानन
भट्टाचार्यविरचितःकारकवादः॥ ॥संवत् १७३२ समयेकार्त्तिकसुदिप्रतिपद्दिनेइदंपु
स्तकंसुखदेवमिश्रेणलिखितम्॥ ॥शुभमस्तु॥ ॥शिवायनमः॥ ॥छ॥